श्रीविष्णुसहस्रनामस्तोत्रम्

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.

संस्करण : अगस्त २०१९, संवत् २०७६

मूल्य –

सादा गुटका ३० रुपये मात्र

रेशमी जिल्द ५० रुपये मात्र

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

अथ

श्रीविष्णुसहस्रनाम-

प्रारम्भः

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.

शेषशायी


वराहावतार

शेषशायी

वराहावतार

सनकादिक

वि.
यज्ञ अवतार
शि.
ब्र


नर नारायण अवतार.

कपिल अ.
दतात्रय अ.

ऋषभ अवतार.
ध्रुव अ.


गोवत्स
पृथु राजा

हयग्रीव
अ.

रत्नानि

मत्स्य अव०
शं०


नृसिंह
अवतार
प्रल्हाद

बली
वामनावतार

गजेंद्र
हरि अव


हंसावतारः


मन्वतरावतार.

धन्वतरी

सहस्त्रार्जुन
परशुराम.


वरदहस्त.
वेदव्यास.


रामावतार.
सी.
ल.
भ.

श्रीकृष्ण
अवतार.


बुद्धावतार

कल्क्य अवतार.

|| श्रीः ||

|| अथ मङ्गलम् ||

||श्रीहयग्रीवाय नमः||

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ २ ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ ३ ॥
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ॥
नमो वै ब्रह्मविधये वासिष्ठाय नमो नमः ॥ ४ ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ॥
अभाललोचनः शम्भुर्भगवान् बादरायणिः ॥ ५ ॥

॥ अथ विष्णुसहस्रनाम प्रारम्भः ॥

॥ लक्ष्मीवेङ्कटेशाय नमः ॥

यस्य स्मरणमात्रेण जन्मसंसारबंधनात् ॥
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ १ ॥
नमः समस्तभूतानामादिभूताय भूभृते ॥
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ २ ॥

॥ वैशम्पायन उवाच ॥

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ॥
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ ३ ॥

॥ युधिष्ठिर उवाच ॥

किमेकं दैवतं लोके किं वाप्येकं परायणम् ॥
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ ४ ॥
को धर्मः सर्वधर्माणां भवतः परमो मतः ॥
किं जपन्मुच्यते जन्तुर्जन्मसंसारबंधनात् ॥ ५ ॥

|| भीष्म उवाच ||

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ||
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः|| ६ ||
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ||
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च || ७ ||
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ||
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् || ८ ||

वि.
स.
३०

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ॥
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ९ ॥
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ॥
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १० ॥
परमं यो महत्तेजः परमं यो महत्तपः ॥
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ११ ॥
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ॥
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १२ ॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ॥
यस्मिंश्च प्रलयं यान्तिं पुनरेव युगक्षये ॥ १३ ॥ वि.
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ॥ स.
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १४ ॥ ३१
यानि नामानि गौणानि विख्यातानि महात्मनः ॥
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥१५॥
ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ॥
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः॥ १६ ॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ॥
अनेकरूपं दैत्यान्तं नमामिपुरुषोत्तमम् ॥ १७ ॥
अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्र महामंत्रस्य
भगवान्वेदव्यास ऋषिः ॥

॥ अनुष्टुप् छन्दः ॥

श्रीकृष्णः परमात्मा ॥ श्रीमन्नारायणो देवता॥
अमृतांशूद्भवो भानुरिति बीजं॥ देवकीनंदनः
स्रष्टेति शक्तिः ॥ त्रिसामा सामगस्सामेति हृदयम्॥

शंखभृन्नन्दकी चक्रीतिकीलकम् ।। शार्ङ्गधन्वा गदाधर इत्यस्त्रम् ।। रथाङ्गपाणिरक्षोभ्य इतिकवचम्।। उद्धवःक्षोभणो देव इति परमोमन्त्रः ।। श्रीकृष्ण प्रीत्यर्थे सहस्रनामस्तोत्रजपे विनियोगः ।।

।।अथ करन्यासः ।।

ॐ उद्धवाय अंगुष्ठाभ्यां नमः ।। ॐ क्षोभणाय तर्जनीभ्यां नमः ।। ॐ देवाय मध्यमाभ्यां नमः ।। ॐ उद्धवाय अनामिकाभ्यां नमः ।। ॐ क्षोभणाय

कनिष्ठिकाभ्यां नमः ॥ ॐ देवाय करतलकर-

पृष्ठाभ्यां नमः ॥ इति करन्यासः ॥

॥ अथ हृदयादिषडङ्गन्यासः ॥

सुव्रतः सुमुखः सूक्ष्मः ज्ञानाय हृदयाय नमः ॥
सहस्रमूर्धा विश्वात्मा ऐश्वर्याय शिरसे स्वाहा ॥
सहस्रार्चिः सप्तजिह्वः शक्त्यै शिखायै वषट् ॥
त्रिसामा सामगः साम बलाय कवचाय हुम् ॥

रथाङ्गपाणिरक्षोभ्यस्तेजसे नेत्राभ्यां वौषट् ॥

शार्ङ्गधन्वागदाधरः वीर्यायअस्त्राय फट् ॥

ऋतुः सुदर्शनः कालः भूर्भुवस्स्वरोम् दिग्बधः ॥

॥ इति हृदयादिन्यासः ॥

॥ अथ ध्यानम् ॥

ॐ क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकतै-
मौक्तिकानां मालाक्लृप्ताऽसनस्थः स्फटिक मणि-
निभैर्मौक्तिकैर्मण्डिताङ्गः ॥ शुभ्रैरभ्रैरदभ्रैरुपरिवि-

वि. स. ३६

रचितैर्मुक्तपीयूषवर्षैरानन्दी नः पुनीयादरिनलिन-
गदाशंखपाणिर्मुकुन्दः ॥ १ ॥

॥ अथवा ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च
नेत्रे, कर्णावाशाः शिरो द्यौर्मुखमपिदहनो यस्य
वास्तेयमब्धिः ॥ अन्तस्थं यस्य विश्वं
सुरनरखगगोभोगिगंधर्वदैत्यैश्चित्रं रंरम्यते तं
त्रिभुवनवपुषं विष्णुमीशं नमामि ॥ २ ॥

|| अथवा ||

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ||
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् || ३ ||

|| अथवा ||

मेघश्यामं पीतकौशेयवासं
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ||

वि.
स.
३८

पुण्योपेतं पुण्डरीकायताक्षं
विष्णुं वन्दे सर्वलोकैकनाथम् ॥ ४ ॥

॥ अथवा॥

सशंखचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ॥
सहारवक्षस्थलकौस्तुभश्रियं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥ ५ ॥

ॐ विश्वंविष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ॥
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १ ॥
पूतात्मा परमात्मा च मुक्तानां परमागतिः ॥
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २ ॥
योगोयोगविदांनेता प्रधानपुरुषेश्वरः ॥
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३ ॥
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥

वि. स. ४०

स्वयंभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ॥
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः॥ ६ ॥
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ॥
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ ७ ॥
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ॥
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ वि.
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥ स.
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ॥ ४१
अहः संवत्सरो व्यालःप्रत्ययः सर्वदर्शनः॥ १० ॥
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ॥
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११ ॥
वसुर्वसुमनाः सत्यः समात्मा संमितः समः ॥
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥ १२ ॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ १३ ॥
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ॥
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥ १४ ॥
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ॥
चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ॥
अतीन्द्रः संग्रहःसर्गो धृतात्मा नियमो यमः ॥ १७ ॥
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ॥
अतीन्द्रियो महामाया महोत्साहो महाबलः ॥ १८ ॥
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ॥
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९ ॥
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ॥
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥ २० ॥

वि.
स.
४४

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ॥
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥
अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ॥
अजोदुर्मर्षणः शास्ताविश्रुतात्मा सुरारिहा ॥ २२ ॥
गुरुर्गुरुतमो धाम सत्य सत्यपराक्रमः ॥
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥
अग्रणीर्ग्रामणोः श्रीमान्न्यायोनेता समीरणः ॥
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४ ॥

आवर्त्तनोनिवृत्तात्मा संवृतः सम्प्रमर्दनः ॥
अहः संवर्त्तकोवह्निरनिलो धरणीधरः ॥ २५ ॥
सुप्रसादः प्रसन्नात्मा विश्वधृग्विभुग्विभुः ॥
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६ ॥
असङ्ख्येयोः प्रमेयात्मा विशिष्टः शिष्टकृच्छुचि : ॥
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः॥ २७ ॥
वृषाही वृषभो विष्णुर्वृषपर्वावृषोदरः ॥
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८ ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ॥
ऋद्धः स्पष्टाक्षरोमन्त्रश्चंद्रांशुर्भास्करद्युतिः ॥ ३० ॥
अमृतांशूद्भवोभानुः शशबिंदुः सुरेश्वरः ॥
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१ ॥
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ३२ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ॥ वि.
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ३३ ॥ स.
इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ॥ ४७
क्रोधहा क्रोधकृत्कर्त्ता विश्वबाहुर्महीधरः ॥ ३४ ॥
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ॥
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६ ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥
अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ॥ ३७ ॥
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षोगरुडध्वजः ॥ ३८ ॥
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥
सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ॥ ३९ ॥
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥
महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥
करणं कारणं कर्त्ता विकर्त्ता गहनोगुहः ॥ ४१ ॥
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ॥
परर्द्धिः परमः स्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२ ॥
रामो विरामो विरजो मार्गो नेयो नयोऽनयः ॥
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३ ॥
वैकुण्ठः पुरुषः प्राणः प्राणदो प्रणवः पृथुः ॥
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४ ॥

वि.
स.
५०

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥
विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ॥
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६ ॥
अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ॥
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७ ॥
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ॥
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ॥
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ ॥
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ॥
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥
धर्मगुब्धर्मकृद्धर्मी सदसत् क्षरमक्षरम् ॥
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१ ॥
गभस्तिनेमिः सत्त्वस्थः सिंहोभूतमहेश्वरः ॥
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३ ॥
सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ॥
विनियोगः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥ ५४ ॥
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ॥
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५ ॥
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ५६ ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७ ॥
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ॥
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ॥
वरुणो वारुणो वृक्षः पुष्करक्षो महामनाः ॥ ५९ ॥
भगवान् भगहा नन्दी वनमाली हलायुधः ॥
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६० ॥

वि.
स.
५४

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ॥
दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ॥
संन्यासकृच्छमः शांतो निष्ठाशांतिः परायणः ॥ ६२ ॥
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ॥
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ६४ ॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥
श्रीधरः श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः ॥ ६५ ॥
स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६ ॥
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ॥
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७ ॥
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ॥
अनिरुद्धोऽप्रतिरथःप्रद्युम्नोऽमितविक्रमः ॥ ६८ ॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः।। ६९ ।।
कामदेवः कामपालः कामी कान्तः कृतागमः ।।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ।। ७० ।।
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ।। ७१ ।।
महाक्रमो महाकर्मा महातेजा महोरगः ।।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ।। ७२ ।।

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ॥
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३ ॥
मनोजवः तीर्थकरो वसुरेता वसुप्रदः ॥
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४ ॥
सद्गति सत्कृतिः सत्ता सद्भूतिः सत्परायणः ॥
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५ ॥
भूतावासो वासुदेवः सर्वासु निलयोऽनलः ॥
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ७६ ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ॥
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७ ॥
एको नैकः स वः कः किं यत्तत्पदमनुत्तमम् ॥
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८ ॥
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ॥
वीरहा विषमः शून्योधृताशीरचलश्चलः ॥ ७९ ॥
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ॥
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८० ॥

तेजोवृषो द्युतिधरः सर्व शस्त्रभृतांवरः ॥
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ८१ ॥
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥
चतुरात्मा चतुर्भावश्चतुर्वेद विदेकपात् ॥ ८२ ॥
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ॥
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३ ॥
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ॥
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४ ॥

वि.
स.
६०

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ॥
अर्को वाजशनः शृंगी जयन्तस्सर्वविज्जयी ॥ ८५ ॥
सुवर्ण बिन्दु रक्षोभ्यः सर्ववागीश्वरेश्वरः ॥
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६ ॥
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ॥
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७ ॥
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ॥
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८ ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ॥
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९ ॥
अणुर्बृहत्कृशः स्थूलोगुणभृन्निर्गुणो महान् ॥
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९० ॥
भारभृत्कथितो योगी योगीशः सर्व कामदः ॥
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ॥
अपराजितः सर्वसहो नियन्ता नियमो यमः ॥ ९२ ॥

सत्त्ववान्सात्विकः सत्यः सत्यधर्मपरायणः ॥
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥ ९३ ॥
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥
रविर्विरो:चनः सूर्यः सविता रविलोचनः ॥ ९४ ॥
अनन्तो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः ॥
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥
सनात्सनातनतमः कपिलः कपिरव्ययः ॥ स्वस्तिदः
स्वस्तिकृत्स्वस्ति स्वस्तिभुक् स्वस्ति दक्षिणः । ९६ ।

अरौद्रः कुण्डली चक्री विक्रम्यूर्जित शासनः ॥
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७ ॥
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ॥
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८ ॥
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ॥
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ९९ ॥
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ॥
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १०० ॥

वि. स. ६४

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ॥
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १ ॥
आधारनिलयो धाता पुष्पहासः प्रजागरः ॥
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ २ ॥
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ॥
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ ३ ॥
भूर्भुवः स्वस्तरुस्तारः सपिताप्रपितामहः ॥
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ ४ ॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ॥
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ ५ ॥
आत्मयोनिः स्वयं जातो वैखानः सामगायनः ॥
देवकीनन्दनः स्रष्टा क्षितीश. पापनाशनः ॥ ६ ॥
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ॥
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ ७ ॥

सर्व प्रहरणायुधः ओंनम इति ॥

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ॥
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ ८ ॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।।
नाशुभं प्राप्नुयात्किंचित् सोऽमुत्रेह च मानवः ।। ९ ।।
वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।।
वैश्योधनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ।। ११० ।।
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाः ।। ११ ।।
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ।। १२ ।।

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ॥
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ १३ ॥
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ॥
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ १४ ॥
रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ १५ ॥
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ॥
स्तुवन्नामसहस्रेण नित्यं भक्ति समन्वितः ॥ १६ ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ॥
सर्वपाप विशुद्धात्मा याति ब्रह्म सनातनम् ॥ १७ ॥
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥
जन्ममृत्युजराव्याधि भयं नैवोपजायते ॥ १८ ॥
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥
युज्येतात्मा सुखक्षान्ति श्रीधृतिस्मृतिकीर्तिभिः ॥ १९ ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ २० ॥

द्यौस्सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ॥
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ २१ ॥
ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ॥
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ २२ ॥
इन्द्रियाणि मनो बुद्धिः सत्वं तेजो बलंधृतिः ॥
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ २३ ॥
सर्वागमानामाचारः प्रथमं परिकल्पते ॥
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ २४ ॥

वि. स. ७०

ऋषयः पितरो देवा महाभूतानि धातवः ॥
जङ्गमाजङ्गमं चेदं जगन्नारायणोभ्द्‌दवम् ॥ २५ ॥
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ॥
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ २६ ॥
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रीन्
लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ।२७।
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ॥
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २८ ॥

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ॥
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥ २९ ॥

॥ अर्जुन उवाच ॥

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ॥
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ ३० ॥

॥ श्रीभगवानुवाच ॥

यो मां नाम सहस्रेण स्तोतुमिच्छति पाण्डव ॥
सोहमेकेन श्लोकेन स्तुत एव न संशयः ॥ ३१ ॥

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि-
शिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय
शाश्वते सहस्रकोटियुगधारिणे नमः ॥ ३२ ॥
नमः कमलनाभाय नमस्ते जलशायिने ॥
नमस्ते केशवानन्त वासुदेव नमोस्तुते ॥ ३३ ॥
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ॥
सर्वभूतनिवासोऽसि वासुदेवायनमोस्तुते ॥ ३४ ॥

नमोब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥ ३५ ॥
आकाशात्पतितं तोयं यथा गच्छति सागरम् ॥
सर्वदेव नमस्कारः केशवं प्रति गच्छति ॥ ३६ ॥
एष निष्कण्टकः पन्था यत्र संपूज्यते हरिः ॥
कुपथं तं विजानीयाद्गोविन्दरहितागमम् ॥ ३७ ॥
सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥
तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम् ॥ ३८ ॥

यो नरः पठते नित्यं त्रिकालं केशवालये ॥
द्विकालमेककालं वा क्रूरं सर्वं व्यपोहति ॥ ३९ ॥
दह्यंते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः ॥
विलीयन्ते च पापानि स्तवेह्यस्मिन्प्रकीर्तिते ॥ ४० ॥
येन ध्यातः श्रुतो येन येनायं पठितः स्तवः ॥
दत्तानि सर्व दानानि क्रूराः सर्वेसमर्चिताः ॥ ४१ ॥
इहलोके परे वापि न भयं विद्यते क्वचित् ॥
नाम्नां सहस्रं योऽधीते द्वादश्यां मम सन्निधौ ॥ ४२ ॥

सनिर्दहति पापानि कल्पकोटिशतानि च ॥
अश्वत्थसन्निधौ पार्थ कृत्वा मनसि केशवम् ॥ ४३ ॥
पठेन्नाम सहस्रं तु गवांकोटिफलं लभेत् ॥
शिवालये पठेन्नित्यं तुलसीवनसंस्थितः ॥ ४४ ॥
नरो मुक्तिमवाप्नोति चक्रपाणेर्वचोयथा ॥
ब्रह्महत्यादिकं पापं सर्वंसद्यो विनश्यति ॥ १४५ ॥

इति श्रीमन्महाभारते शतसाहस्र्यां वैयासिक्यामानु-
शासनिके पर्वणि दानधर्मे भीष्म युधिष्ठिर संवादे
श्रीविष्णोर्दिव्य सहस्रनाम स्तोत्रं संपूर्णम्।

मुद्रक एवं प्रकाशक:

खेमराज श्रीकृष्णदास,

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, मुंबई - ४०० ००४.

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११ ०१३.

३) गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि. ठाणे - महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

इति

श्रीविष्णुसहस्रनाम-

समाप्त :

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.